Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्री परमात्मने नमः ॥

॥ तपोगच्छनभोनमोमणिभट्टारकंपरमपूज्याचार्य-

श्रीमद्विजयनेमिसूरीश्वर-

पादपद्मचरणाम्भोजभृंगायमाणानुयोगाचार्यपन्न्यास-

श्रीमदुदयविजयगणि-

शिष्यमुनि "नन्दनविजय" विरचितः ॥

# ॥ स्तोत्रभानुः ॥

---

राजनगरवास्तव्य. शेठ. लालभाई भोगीलाल

इत्येतस्य द्रव्यसाहाय्येन.

राजनगर ( अमदावाद )स्थजैनग्रन्थप्रकाशकसभायाः

कार्यवाहकः

शा. घाडीलाल बापुलाल इत्यनेन

प्राकाश्यं नीतः

अमदावाद–श्री जैन एडवोकेटमुद्रणालये

शा. चीमनलाल गोकळदास इत्यनेन मुद्रितः

प्रत ५००. सने १९१६.

मूल्य ०–२–०.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# प्रस्तावना.

प्रिय सज्जनो? आज आपना करकमलमां आ देवगुरुस्तवनामय स्तोत्रभानु नामनुं लघुपुस्तक अर्पण करवामां आवेछे, आ पुस्तकनी रचनाकरनार जगद्विख्यातभारतमेदिनीमार्तण्डसर्वतन्त्रविद्यावैभवचमत्कृतविद्वन्मण्डलमहामाहिमाशाली अमेयगुणनिधानभट्टारक तपोगच्छाधिराज श्री श्री १००८ श्री आचार्यमहाराज श्री यनेमिसूरीश्वरजीमहाराजना प्रशिष्य अने सिद्धान्तादिना भिन्नदर्शनप्रभावक अनुयोगाचार्य पन्न्यासजीमहाराजश्री उद जीगणिना शिष्यरत्न पूज्यपाद श्रीमान् नन्दनविजयजी म तेओसाहेबजी, संसारीपणामां, सौराष्ट्रदेशमां भावनगर प्रान्तमा बशाहेरना वतनी हता दशा श्रीमाल वणिग्ज्ञातिय शा. हेमचंद जीना कुलदीपक पुत्ररूपे रत्नकुक्षिणी माता जमनाबाइनी कु जन्मधारण कर्यो हतो.

तेओश्रीने प्रव्रज्यापर्यायने लगभग त्रण वर्ष थयाछे, ते संसारीपणाना पिता, माता, वडीलबन्धु विगेरे तेओने वन्द सादरी मुकामे गया हता तेओ तेओनी उत्तम प्रकारनी वैरा दशा तथा ज्ञानादिगुणो देखी अत्यन्त आनन्द पाम्या हता आ उत्तम जीवोने धन्यवाद घटेछे.

ग्रन्थकर्ता महात्माए लख्युंछे के अमारी नवीन कृतिमां अ अलंकार तथा कल्पना विगेरे कांइपण नही देखाय तोपण प्रभु क्तिनी प्रेरणाथी रचवामां आवेली मारी आ रचनामां जो कांइप स्खलना जणाय तो ते सज्जनपुरुषो क्षमा करशे, अने हुं पण ते संबंधे मिथ्यादुष्कृत दउंछुं.

प्रियपाठको? शुद्धिमां दृष्टिदोषथी या मुद्रणदोषथी जे भूलो रही होय ते सुज्ञो क्षमा करशे.

निवेदक–

जैनग्रन्थप्रकाशकसभाना कार्यवाहक

वाडीलाल बापुलाल शाह.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

॥ श्रीपरमात्मने नमः ॥

॥ श्रीमद्गुरुपादेभ्यो नमः ॥

विद्यापीठादिप्रस्थानपञ्चकाराधकस्वपरागमपरिशीलनावाप्तापूर्वैदम्प-
र्यचिन्तामणिप्रभूतशीलप्रभावचारित्रचूडामणितपो-
गच्छनभोनभोमणिभट्टारकपरमपूज्याचार्य-
श्रीमद्विजयनेमिसूरि-
पवित्रचरणाम्भोजभृङ्गायमाणानुयोगाचार्यपन्न्यास-
श्रीमदुदयविजयगणि-
शिष्यमुनि "नन्दनविजय" विरचितः ॥

# ॥ स्तोत्रभानुः ॥

( वसन्ततिलका )

तीर्थाद्यमीशममरेन्द्रनरेन्द्रनम्यं
भव्यात्मनां परुषपापतमःपतङ्गम् ।
ऐक्ष्वाकमाद्यमधिपं जिनसङ्घचन्द्र-
मानन्त्यकेवलपतिं सततं नमामि ॥१॥

स्याद्वादवारिधिविधुर्नरदेववन्द्यः
सारङ्गलक्षणधरो भविपुष्करार्कः ।
मुक्त्यङ्गनासुखरतो जिनशान्तिनाथो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भव्यश्रिये भवतु पापवनीकृशानुः ॥२॥
कृत्वा तपोनिचयमाशु मुदाप्तमुक्तिं
तं कर्मपङ्कजहिमं शमवारिराशिम् ॥
शुद्धप्रबोधजलधिं यदुवंशकेतुं
वन्दे समुद्रविजयाङ्गजमाप्तवर्यम् ॥३॥
ज्ञानश्रियं भवसरित्पतिपोतमर्घ्यं
तं मोहकुञ्जरहरिं जगदीश्वरेन्दुम् ॥
धैर्येण मेरुसदृशं भृशमाश्वसेनिं
वामाङ्गजातमुरगाङ्कमहं स्तवीमि ॥४॥
क्षीराब्धिवारिकलशैर्मरुदङ्गनौघैः
सुस्नापितं भवगदागदमर्कभासम् ॥
जन्मप्रवाहचितकर्मबलारिवीरं
नित्यं जगज्जनविभुं प्रणमामि वीरम् ॥५॥

(शार्दूलविक्रीडितम्)

नानाकर्मरजोऽनिलं प्रकटितस्याद्वादशास्त्रामृतं
सेव्यश्रीजगदीशवीरममरव्यूहाभिनम्यं सदा ॥
प्राप्तज्ञानदिवाकरं सुखकरं मुक्तिप्रियाया वरं
नित्यं नौमि मुनीश्वरं गणधरं श्रीगौतमस्वामिनम्॥१॥
सन्मान्यं सुखदायिनं ततयशोदीर्घापगं भूतल

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



इष्टार्थामरशाखिनं वतसरश्चक्राङ्कमिन्दर्चिषम् ॥
शिष्यव्यूहसुसेवितं मदरिपोर्जेतारमानन्ददं
वन्देऽहं मुनिराजवृद्धिविजयं शान्तामृताब्धिं सदा॥२॥

( शिखरिणी )

गुणव्रातावासं कुमुदपतिभासं व्रतिवरं
तरीतारं भावं भवजलधिनावं सुखकरम् ॥
सदा श्रीसङ्घेन्दीवरदिनकरं सन्नतमहं
स्तुवे श्रीसूरीशं मुनिभशशिनं नेमिविजयम्॥१॥

( वसन्ततिलका )

श्रीवीरशासनदिवाकरनेमिसूरि-
पट्टोदयाद्रिकमलप्रिययोगिनाथम् ॥
सिद्धान्तविज्ञमहमासमुनित्वरत्न-
मासन्नमुक्तिमुदयं प्रणमामि नित्यम् ॥१॥

## ॥ श्रीचतुर्विंशतिजिनचैत्यवन्दनानि ॥

### ॥ आदिनाथचैत्यवन्दनम् ॥

( शार्दूलविक्रीडितम् )

यद्ध्यानेन नरा निरन्तरसुखं मोक्षं लभन्तेऽचिरं
यन्नामस्मरणेन सर्वदुरितं याति प्रदूरं द्रुतम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



यन्मूर्त्तेरभिदर्शनेन नयने शान्ताऽमृतं पाप्नुतो
भव्यानामभयाय सोऽस्तु सततं नाभेय आदीश्वरः॥१॥
कृत्वा योऽखिलकर्मगाढजलदं दूरं तपोवायुना
प्राप्य ज्ञानरविं ददर्श सकलं लोकस्वरूपं भृशम् ॥
गत्वाष्टापदमाप्तबन्धुरपदो नष्टाखिलापत्तिक
ऐक्ष्वाको वृषलक्षणो विजयतामादिप्रभुस्सर्वदा ॥२॥
प्रापुः पारमपारजन्मजलधेर्यद्धर्मसन्नौकया
प्राप्स्यन्ति प्रमुदाप्नुवन्ति भविनोऽनेके विशुद्धं वरम्॥
विश्वेशानमहं जिनेन्दुमनिशं शान्त्यालयं सुन्दरं
दिव्यानन्दनदीपतिं यतिपतिं तं मारुदेवं स्तुवे ॥३॥

॥ अजितनाथचैत्यवन्दनम् ॥

( तोटकम् )

जगतीभविनामघपद्महिमं
दृढमोहमहागजकेसरिणम् ॥
अजितं सततं जिनचन्द्रमहं
प्रणमामि विभुं नृसुरप्रणतम् ॥१॥
भवकर्मखलानभिजित्य बला--
दसमाचलमाप पदं रुचिरम् ॥
स विभुः प्रवरोऽभयरोपकरो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



मतिदो वरदोऽस्तु सदोदयदः ॥१॥
जगतां प्रभुतां भवितारकतां
भविता लविता भववल्लिवनम्॥
सुतपश्चरिता शिवमातनुतां
जितशत्रुसुनन्दन आप्तवरः ॥३॥

॥ श्रीसम्भवनाथचैत्यवन्दनम् ॥

( अनुष्टुब् )

प्रगाढपारमानेता, दुस्तरस्य भवोदधेः ॥
कामितानि प्रदत्ते य-द्धर्मः कल्पतरूपमः ॥१॥
चारुपोतं भवाम्भोधौ, विश्वनाथं तमीश्वरम् ॥
यस्य वागमृतं पीत्वा-ऽक्षयं यान्ति पदं जनाः ॥२॥
श्रुताम्भोजसरोवर्यं, सत्सङ्घातविधुं विभुम् ॥
सर्वदा सम्भवं भक्त्या, जितारेर्नन्दनं स्तुवे ॥३॥
(त्रिभिर्विशेषकम् ॥)

॥ श्रीअभिनन्दनचैत्यवन्दनम् ॥

( वंशस्थवृत्तम् )

सुरासुरेज्यं रुचिरं सुखालयं
हरन्तमीशं प्रचुरं महाभयम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



हिरण्यदीप्तिं प्रवरप्रबोधिनं
नमामि तुर्यं जिनराजमिष्टदम् ॥१॥

सुराङ्गनाभिर्वरकाञ्चनैर्घटैः
पूर्णैर्महाक्षीरसमुद्रवारिभिः ॥
कृताभिषेकामलकाञ्चनाचले
जिनप्रभो त्वं जय संवराङ्गज ॥२॥

येनाखिलं गाढमहातमो हतं
दुष्कर्मरूपं रविनेव संस्तुतेः ॥
जिगाय यो दुष्टमनोजभासुर
स्ताच्छर्मदाताशु स वोऽभिनन्दनः ॥३॥

---

॥ श्रीसुमतिनाथचैत्यवन्दनम् ॥

( द्रुतविलम्बितम् )

वरद इन्दुरुची रुचिरार्णवः
श्रुतमतेरभिरूपसुसेवितः ॥
प्रहतकर्ममहाजगलः प्रभु–
र्विजयतां सततं स जगद्विभुः ॥१॥

हतमहाखिलमोहतमस्ततिं
सकलसौख्यदमाप्तवरास्पदम् ॥
सुखसरोवरहंसमहं स्तुवे

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सुमतिधाम सदा सुमतिप्रभुम् ॥ २॥
सकलसंसृतिदुःखमहोत्पलं
हिम इवाभिददाह य इष्टदः ॥
निरुपमः प्रशमाब्धिरसौ विभु-
र्जयति मेघसुनन्दन ईश्वरः ॥३॥

॥ श्रीपद्मनाथचैत्यवन्दनम् ॥

( शालिनी )

रागद्वेषारण्यमाशु प्रघोरं
दाह्यं दग्धं यत्प्रभासाऽग्निनेव ।
भव्यौघानां तत्सुसीमात्मजस्य
भूत्यै भूयात्पादपाथोजयुग्मम् ॥१॥
दुष्टाज्ञानद्वेषिसङ्घातशूर
सुज्ञश्रेष्ठ प्राज्ञगम्य प्रधान ।
दिव्यज्ञान श्रीपते पद्मनाथ
मुक्तीशानाभ्यर्चनीयोऽसि मे त्वम् ॥२॥
देवाधीशं सर्वकल्याणवल्लिम्
विश्वख्यातं पूजनीयं नृदेवैः ।
पद्मं पद्मं विश्वभव्यद्विरेफैः
नित्यं वन्दे नन्दनं श्रीधरस्य ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीसुपार्श्वनाथचैत्यवन्दनम् ॥

( भुजङ्गप्रयातम् )

सदा निर्जरेज्यो वरो विश्वनाथो
गुणानां पयोधिर्जिनेशोऽमिताभः ॥
पृथिव्यात्मजस्सर्वसौख्यप्रदाता
प्रभुर्यच्छतान्मुक्तिऋद्धिं विशालाम् ॥१॥

महामोहराजारिवारं कठोरं
मदोन्मत्तमातङ्गयूथं विशालम् ॥
पराजिग्य आर्यो महाकेसरीव
स सुश्रेयसे सर्वदा स्तात् सुपार्श्वः॥२॥

शुभध्यानवारा भवावद्यरूपं
मलं येन दूरं प्रगाढं कृतं द्राक् ॥
दयाया नदीकान्तमाखण्डलेज्यं
प्रतिष्ठस्य राज्ञः स्तुवे नन्दनं तम् ॥३॥

॥ श्रीचन्द्रप्रभुचैत्यवन्दनम् ॥

( आर्या )

कृत्वा दूरं सहसा, रागद्वेषाम्बुदं महागहनम् ॥
यद्विज्ञानदिनेशः, सततं भासयति कृत्स्नार्थान् ॥१॥

सर्वज्ञेन्दुर्जिनप–श्चन्द्राङ्काङ्कितपदद्वितय ईशः ॥
जन्माम्भोधिं तीर्त्वा, सुखगेहं वरपदं प्राप॥२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दिव्यैश्वर्यो जयतु, ज्ञेशो धर्मदवरः सुहितदाता ॥
चन्द्रेशस्स नितान्तं, परमानन्दनगपर्जन्यः ॥३॥

॥ श्रीसुविधिनाथचैत्यवन्दनम् ॥

(उपजातिः)

सुपर्वनाथानतमस्तकस्थ-
प्रशस्तमौलिस्थमहामणीनाम् ॥
मरीचिसङ्घातमरं न सेहे
यत्पादयुग्मस्थनखव्रजश्रीः ॥१॥
यन्नामदीपो हृदयस्थितोऽर-
मनादिकालागतमप्रधृष्यम् ॥
तमो विनाशं नयति प्रसह्य
तस्येष्टदातुः सुविधेर्जिनस्य ॥२॥
शिवाङ्घ्रिपारामघनोपमा सा
संसारसिन्धौ भ्रमतां जनानाम् ॥
स्याद्वादयुक्ता वरदेशनागी-
रानन्दनद्यस्तु सदोदयाय ॥३॥ (त्रिभिर्विशेषकम् )

॥ श्रीशीतलनाथचैत्यवन्दनम् ॥

( वसन्ततिलका )

निर्बाधमुक्तिसुखमय्यतरं जिनेन्द्रं

१ नग-वृक्ष.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



निःशेषसत्ततिनतं निरुपद्रवौघम्॥
प्राप्तप्रबोधतरणिं स्मरवारिवाहं
भित्त्वा स्तुवे तमनिशं जिनशीतलेशम् ॥१॥
तुभ्यं नमो निखिलतत्त्वदिवाकराय
तुभ्यं नमः प्रहरते जनजन्मरोगम् ॥
तुभ्यं नमः सुरपतिप्रणताय नित्यं
तुभ्यं नमोऽखिलभवौघविनाशनाय ॥२॥
निर्दोष शोषक प्ररोषजलाशयस्य
नित्यं प्रतोषद सुधर्मवरप्रणेतः ॥
त्वां नाथ ते रुचिरपादसरोजयुग्म
आसक्तनन्दनमधुव्रत आस्तुवेऽहम् ॥३॥

॥ श्रीश्रेयांसनाथचैत्यवन्दनम् ॥

( अनुष्टुब् )

शुद्धधर्मस्य दातारं, पातारं जगतां सदा ॥
सर्वभावस्य वेत्तारं, भातारं भुवनत्रये ॥ १ ॥
मुक्तिमार्गस्य देष्टारं, पेष्टारं कृत्स्नकर्मणः ॥
विश्वविश्वस्य भर्तारं, कर्तारं भव्यशर्मणः ॥२॥
नेतारं जन्मपारस्य, जेतारं मोहवैरिणः ॥
श्रीश्रेयांसजिनं भक्त्या, स्तुवे तं विष्णुनन्दनम् ॥३॥

( त्रिभिर्विशेषकम् )

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीवासुपूज्यचैत्यवन्दनम् ॥

( स्रग्विणी )

शुद्धविज्ञानलक्ष्मीव्रजैर्वन्दितः
शर्मदो विष्टपेशामरेशानतः ॥
कर्मसङ्घातशूरस्य सङ्घातको
वासुपूज्यस्तनोतु प्रसौख्यं सदा ॥ १ ॥
सम्यगाखण्डलौघस्तुताकोंदय-
ज्योतिरङ्घ्र्यब्जयुग्मस्य शर्मोदधेः ॥
वासुपूज्यप्रभोर्नामचिन्तामणिः
स्मर्यतां सर्वदा सर्वभव्यात्मभिः ॥ २ ॥
पूर्णचन्द्रास्यमर्च्यं प्रशस्तोदयं
केतकीपत्रदृष्टिद्वयं मुक्तिदम् ॥
अष्टसत्प्रातिहार्यप्रदीप्तं विभुं
तं जयानन्दनं नौमि नन्दोदधिम् ॥ ३ ॥

---

॥ श्रीविमलनाथचैत्यवन्दनम् ॥

( वैतालीयम् )

भवभीमभयौघपर्वतं, शमवज्रेण बिभेद वेगतः ॥
प्रकठोरतरेण भास्वता, भविकल्याणनगे[२] घनाघनः ॥१॥
निखिलाघमहादृढाटवीं, विमलध्यानहुताशनव्रजः ॥

---

२ नगे- वृक्षे.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



प्रददाह सदाऽस्तु यस्य स, विमलेशस्तनिता शिवस्य नः॥२॥

( युग्मम् )

शिवधाम सुराधिपैर्नुत, त्वमनीशार्च्य जिनाप्तचन्द्रमः ॥
कृतपुष्पशराहितक्षय, जय नित्यं सुतवर्मनन्दन ॥३॥

॥ अनन्तनाथचैत्यवन्दनम् ॥

(रथोद्धता)

जात्यसर्वगुणवारिधिं वरं, भव्यधाम विगतस्पृहं सदा ॥
प्राप्तजन्मविरहं चतुर्दशं, स्तौम्यनन्तजिनपं मुहुर्मुहुः॥१॥
रागरोषपरुषान्धकारक, त्वं प्रगच्छ बहुदूरमाशु रे ॥
अत्र मे सुहृदयोदयाचलेऽनन्तनाथतरणिः प्रकाशते॥२॥
सिंहसेनतनयः सुरस्तुतः, श्रेयसे त्रिभुवनेश्वरः सदा ॥
अस्त्वनन्तगुणरत्नवारिधि-र्भव्यदोहसुखनन्दनः प्रभुः॥३॥

॥ श्रीधर्मनाथचैत्यवन्दनम् ॥

( हरिणी )

भुवनजलजोद्योतब्रध्नं तपोधनधारिणं
भुवनभविनां पीडावारापहं जगदीश्वरम् ॥
प्रवहणवरं संसाराब्धौ महागहने विभुं
शमसुखपदं भानोः सूनुं स्तवीमि सदा मुदा॥१॥
अनुपमगुणो भव्यौघानामनादिभवापहः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



समकलशरच्चन्द्रोद्भासाननोऽसमसौख्यदः ॥
परमविमलं सिद्धिस्थानं सुशोभयिता विभु-
र्भवतु हितकृद्भव्यव्राते स आप्त उदारधीः॥२॥
शमसलिलतश्शान्तोद्दामोरुकामहुताशनः
सुरपतिनताङ्घ्र्यब्जद्वन्द्वस्सदाप्तवरो विभुः ॥
सकलजनताभद्रंकारी त्रिविष्टपनायको
जयतु सततं धर्मेशानो जगज्जननन्दनः ॥३॥

॥ श्रीशान्तिनाथचैत्यवन्दनम् ॥

( मन्दाक्रान्ता )

चन्द्रद्युत्युज्ज्वलशुचितरक्षीरसिन्धुं विशालं
तृन्दञ्छान्तिप्रवरजलधिः सौख्यरत्नप्रपूर्णः ॥
भीष्मज्वालं प्रभवशिखिनं यस्य शीघ्रं ददाम
शश्वज्जीयाज्जिनवरवरः सोऽधिपः शान्तिनाथः॥१॥
इष्टाब्जार्णस्त्रिदशविटपो नेह दृष्टस्तथापि
देवद्रुर्यद्वचनसलिलाद्वर्द्धितो धर्मरूपः ॥
चित्ताभीष्टं शुभमतिमतां भव्यनृणां प्रदत्ते
पादद्वन्द्वं शरणमसमं तस्य शान्तेर्ममास्तु ॥२॥
गाढं बद्धान् विषयजलजेऽनेकभव्यात्मभृङ्गान्
मुक्तान् कृत्वा विमलदययाऽस्थापयत् सिद्धिपद्मे ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तारेशास्यो विदितसकलालोकलोकस्वरूपः
शीघ्रं भव्यप्रशिवतनिता सोऽचिरानन्दनोऽस्तु ॥३॥

॥ श्रीकुन्थुनाथचैत्यवन्दनम् ॥
( रथोद्धता )

भूतसंसृतिपयोधिपारक, प्राप्तकेवलविभासितांशुमन् ॥
सूरनन्दन शिवप्रदेधि मे, त्वं जिनेव शरणं वरं सदा॥१॥
विश्ववन्द्य सुखमन्दिरेश्वर, रञ्जिताखिलजनौघ केवलिन् ॥
जन्मवार्ध्यवधिमेतुमाशु नः, शुद्धधर्मवरपोतदेशक ॥२॥
शोभमानभुवनत्रये सदा, सुप्रतापजलधे सुधीप्रद ॥
कुन्थुनाथ जगदीश्वर प्रभो,त्वां स्तुवे भविकवृन्दनन्दन॥३॥
( युग्मम् )

॥ अरनाथचैत्यवन्दनम् ॥
( इन्द्रवज्रा )

अनन्तसौख्यास्पदसिद्धिगन्ता
नष्टाभिलाषः प्रगताभिमानः ॥
धर्मोपदेष्टा वृजिनौघपेष्टा
कामारिदाता जनकामदाता ॥ १ ॥
आनन्दकल्लोलभृताम्बुराशि–
हंसायमानः कृतिवारपञ्चे ॥
तीर्थंकरो विश्वविभासमानो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नित्यं शिवायास्त्वरनाथ एकः ॥२॥ युग्मम् ॥
विश्वत्रयव्याप्तवरप्रतापं
येनाश्ववाप्तं भुवनेश्वरत्त्वम् ॥
प्राज्यप्रभावं च जिनारनाथं
स्तौम्यन्वहं तं मुनिनन्दनोऽहम् ॥३॥

॥ श्रीमल्लिनाथचैत्यवन्दनम् ॥

( कामक्रीडा )

सद्धर्मेशं ज्योतीरूपं शुद्धाचारं लोकेशं
शश्वत् कृत्स्ने विश्वे व्याप्तं देवेन्द्रैर्नित्यं नम्यम् ॥
संसारापत्तापार्त्तानां भव्यौघानां त्रातारं
कामाग्न्यम्भो मल्लीशानं सिद्धिस्थानस्थं स्तौमि ॥१॥
प्रज्ञावन्तं शान्त्यागारं शीतांश्वास्यं देवेन्द्रं
संसाराब्धौ मर्त्यौघानां बाढं पारं नेतारम् ॥
अर्हन्नाथं गीर्भर्तारं विश्वाम्भोजे मार्तण्डं
कारुण्याब्धिं मल्लीशं तं नित्यं भक्त्या सेवेऽहम् ॥२॥
वीतापाभ्रः सर्वोत्कृष्टो दुस्तीर्थौघाप्रत्यक्षो
येन प्राप्तो ज्ञानार्को द्राग् लोकालोकोद्भासी सः ॥
सौभाग्यश्रीः कल्याणायास्त्वाशु प्रज्ञो भव्यानां
नन्दावासो दग्धद्वेषो लोकाग्रस्थो मल्लीशः ॥३॥

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीमुनिसुव्रतचैत्यवन्दनम् ॥

( अनुष्टुब् )

मुक्तिकासारचक्राङ्को, विश्वेशो मुनिसुव्रतः ॥
रक्षतु प्राणिनो भव्यान्, संसारामयपीडितान् ॥१॥
तपोऽनिलस्य वेगेन, दूरं मोहघनाघनम् ॥
कृत्वा यः प्राप विज्ञान-सप्तवाहं विभासिनम् ॥२॥
यद्वचोऽम्बु मलं हन्ति, कर्मग्रामं च देहिनाम् ॥
कच्छपाङ्कं जनव्राता-नन्दनं स्तौमि तं सदा॥३॥ युग्मम्

॥ श्रीनमिनाथचैत्यवन्दनम् ॥

( उपेन्द्रवज्रा )

अचिन्त्यरूपं समविश्वसार
जितेन्द्रियारिं वरशान्त्यगारम् ॥
सुखद्रुमारामपयोदवारं
तमाप्तसंसारपयोधिपारम् ॥ १ ॥
श्रुताम्बुजाम्बूपममीतमोहं
प्रमादशत्रुप्रविनाशवीरम् ॥
सुराधिदेवं विगताभिलाषं
नमामि नित्यं विजयाङ्गजातम् ॥२॥ युग्मम् ॥
प्रभासमानो भुवनत्रयेषु
प्रभासमानः सुरनाथनाथः ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



तनोतु सौख्यं भविनो नमीशः
सनन्दनः सर्वजनाभिवन्द्यः ॥ ३ ॥

॥ श्रीनेमिनाथचैत्यवन्दनम् ॥
(मालिनी)

सकलसुखनिदानं विज्ञवारप्रधानं
कृतवृजिनविनाशं वीतसंसारपाशम् ॥
विधुसममुखभासं मोक्षलक्ष्मीनिवासं
त्रिभुवनजननाथं स्तौम्यहं नेमिनाथम् ॥१॥
शुचितरपदपद्मोत्कृष्टकल्याणसद्म
गिरिवरगिरिनारोद्भासिबिम्बांशुमालिन् ॥
भविकदुरितपङ्क–क्षालनाम्बूपम त्वं
कृतमदनजयैधि श्रेयसे नेमिनाथ ॥२॥
सुरनरनुतपादाऽऽ–फुल्लिताम्भोजयुग्मं
सिततरयदुवंशाम्भोधिशीतांशुमन्तम् ॥
भुवनतिलकमीशं शङ्खचिन्हं जिनेन्द्रं
जिनपदजलमीनो नन्दनोऽहं भजामि ॥३॥

॥ श्रीपार्श्वनाथचैत्यवन्दनम् ॥
( शिखरिणी )

समा दृष्टिर्यस्याऽसुरसुरनरेशे च कमठे
गतस्तूर्णं पारं भवजलनिधेर्गाढगहनम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अपारे संसारे विषयपरिषत्पीडितजनान्
स नाथः श्रीपार्श्वो जिनवरपती रक्षतु सदा॥१॥

दयाया अम्भोधिः शुचितरमनीषानिचयदः
प्रसूतो वामाङ्गाद्दलितदुरितः संयमिवरः ॥
विराजँल्लोकाग्रे सुखपदकजे हंस इव स
विभुः पार्श्वेशानः कृतिभततिचन्द्रो विजयताम्॥२॥

महाजन्माम्भोधिप्रवहणवरं दोषभरदं
त्रिलोक्यम्भोजप्रोल्लसनतरणिं भव्यवरदम् ॥
जितान्तर्दुष्टौघं विततयशसं विश्वभुवने
नमामि श्रीपार्श्वं समजनसुखाऽऽनन्दनमहम्॥३॥

॥ श्रीवीरनाथचैत्यवन्दनम् ॥

( स्रग्धरा )

गत्वा पापापुरीं यः प्रचुरसुखनिधिं वेगतो मुक्तिमाप
दिव्याचिन्त्यस्वरूपःस्फुटगुणजलधिःकीर्त्तिकान्तिप्रकान्त
तुल्यस्वान्तप्रवृत्तिर्विषमविषधरे सेवके वासवे च
सश्रीवीरस्तनोतु प्रहतमदखलः प्राणिनां भूरिभूतिम्॥१॥

सम्यग्देवेन्द्रसेव्यः स्मरवनदहनः कामहः कामदाता
संसारातङ्कवैद्यः प्रभवभयहरः सिद्धिसौख्यैकभोक्ता ॥
प्राप्तप्रौढप्रतापः कृतवृजिनजयो जन्मपङ्काप्रवाहो

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



दीप्रज्योतिर्जितार्को जयतु जिनवरो वर्द्धमानःप्रकामम्॥२॥
नेत्रानन्दैककन्द स्फुरितविशदधीदातरीशप्रसिद्ध
मिथ्यादृक्पेचकार्कोपम परमशद प्राच्यपादाब्ज वीर ॥
सूतप्रज्ञानसूर्य प्रयतपदगत प्राज्ञपूज्य प्रधान
रिष्टाम्भोजार्यमंस्त्वां जिनपदकमलाऽलिः
स्तुवे नन्दनोऽहम्॥३॥

॥ इति चैत्यवन्दनचतुर्विंशिका ॥

---

॥ आदिनाथस्तुतिः ॥

॥ वसन्ततिलका ॥

ऐक्ष्वाक नाभिज जिताखिलमोहवीर
तीर्थङ्करादिम शमामृतसागरेन्दो ॥
आद्यासुरामरनराधिपसेव्यमान
श्रीवीतराग वृषभाङ्क सदा स्तुवे त्वाम् ॥१॥
जन्मार्णवप्रवरपोतक इष्टदायी
कन्दर्प्पपावकपयोऽचलमुक्तिभर्त्ता ॥
मिथ्यात्विघूकभविकोत्पलसप्तसप्ति-
र्जीयाज्जिनेन्द्रनिकरः सुरमौलिनम्यः ॥२॥
मोक्षाय लुब्धतरविष्टपदेहिचित्तं
न्याय्यं सदा जिनवराननसुप्रसूतम् ॥
जैनागमं सकलदोषतमस्तमोऽरिं
विश्वात्मशर्मजलधीन्दुमहं स्तवीमि ॥३॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गन्त्री सदा गगनमार्गमहासुऋद्धिः
श्रीसङ्घविघ्नभरकोकनदे हिमानी ॥
तार्क्ष्यासना सुखकरी सदभिप्रणम्या
चक्रेश्वरी जयतु नित्यमपारशक्तिः ॥४॥

॥ श्रीशान्तिनाथस्तुतिः ॥

॥ स्रग्धरा ॥

नृत्यद्देवाङ्गनौघैरचलितमनसं कर्मदुष्टारिवीरं
व्याप्तज्ञानार्कभासं सकलजगति तं विश्वभव्यानवन्तम् ॥
योग्यृक्षेन्दुं जिनेन्द्रं कुशलजलनिधिं विश्वसेनाङ्गजातं
शान्तिव्रातं धरन्तं सुरनृपतिपतिं स्तौम्यहं शान्तिनाथम् ॥१॥

नित्यं नाभेयमीडेऽजितसुमतिजिनौ संभवानन्तमल्लीन्
श्रेयोदं नन्दनं तं ससुविधिविमलं पद्मचन्द्रौ सुपार्श्वम् ॥
श्रेयांसं शीतलेशं प्रशमरसनिधिं वासुपूज्यारकुन्थून्
धर्मं शान्तिं च नेमिं जिनमुकुटनमिं सुव्रतं पार्श्ववीरौ ॥२॥

श्रेयोवृन्दं ददाति प्रभवभयभरं हन्ति कामप्रदात्री
हर्षव्रातं प्रदत्ते भवशिखिपतितप्राणधारिव्रजेभ्यः ॥
मुक्त्यम्भाजं प्रसूते भविकशिवतरुं सर्वदा सिञ्चते या
साऽर्हद्वाण्यम्बुमाला प्रसरतु सततं गाढपारा त्रिलोक्याम् ॥३॥

या विघ्नौघप्रहर्त्री प्रगुणगणवती हेमदीप्तिं हरन्ती

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सेव्यश्रीशान्तिनाथा निखिलजनमवन्त्यर्हदाज्ञां धरन्ती ॥
इष्टार्थं पूरयन्ती सकलसुखकरी शर्मवल्लिर्विशाला
सा निर्वाणी प्रदत्तां शुभमतिभविने श्रेष्ठमानन्दवारम्॥४॥

---

॥ श्रीनेमिनाथस्तुतिः ॥

॥ उपजातिः ॥

गत्वा गिरीन्द्रं गिरिनारमाप्त्वा
वरव्रतं देवनरेन्द्रपूज्यम् ॥
मुक्तिप्रियां स्नेहभराद्य आप
स नेनिनाथोऽवतु विश्वभव्यान् ॥१॥
ये कर्मसङ्घं जलदं महान्तं
जहुः स्ववीर्याऽतुलवायुवृन्दैः ॥
ते सिद्धिसौधप्रतिभासमानाः
सुरासुरस्तुत्यजिना जयन्तु ॥ २ ॥
प्रदग्धदोषौघविशालदावं
नीतिप्रमाणप्रथितार्थतत्त्वम् ॥
मिथ्यान्धकारार्यमणं सदैव
जैनागमं श्रेष्ठमहं स्तवीमि ॥ ३ ॥
सम्यक्त्वरत्नं प्रमुदा धरन्ती
त्रिशूलधात्री वरसङ्घपात्री ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सा कामितौघं परिपूरयन्ती
देव्यम्बिका शर्म सदा प्रदत्ताम् ॥ ४ ॥

॥ श्रीपार्श्वनाथस्तुतिः ॥
॥ मालिनी ॥

दृढतमतमवारं दुःखभारं हरन्तं
निखिलभविकचेतः पङ्कजं पुष्पयन्तम् ॥
जगति ततपोंऽशुं कर्मरात्रेरराति
भविहृदयखवासं स्तौमि तं पार्श्वभानुम् ॥१॥
चुलुककृतभवाब्धिं संसृतौ प्रभ्रमन्तं
जननिकरमवन्तं मुक्तिमार्गं दिशन्तम् ॥
विदितभुवनभावं भावसिन्धौ सुनावं
जिनवरतरवारं नौमि विश्वैकसारम् ॥२॥
अमितगमनिवासं गूढतत्त्वप्रकाशं
विहतसकलदोषाऽर्हन्मुखाब्जप्रसूतम् ॥
गहनतरमपारं भव्यभृङ्गालिसेव्यं
शमरसपरिपूर्णं जैनसिद्धान्तमीडे ॥३॥
कनकसमसुकान्ते भव्यभव्यं धरन्ति
वरतरफणिपीठे नित्यमभ्रे चरन्ति ॥
श्रिततमजिनपार्श्वे विघ्नवारं हरन्ति
अतुलममलभद्रं देहि पद्मावति त्वम् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीवर्द्धमानजिनस्तुतिः ॥

॥ शार्दूलविक्रीडितम् ॥

शच्यः स्नापितवत्य आर्यकलशैर्जन्मोत्सवे यं मुदा
प्राप्तानन्तसुखस्स कम्पिततराद्रीशानहेमाचलः ॥
देवेन्द्रादिसुपूजितोऽन्तिमजिनो वीरो विभुस्सर्वविन्
मोहाम्भोजहिमः प्रबोधकुमुदेन्दुः पातु वः सर्वदा॥१॥

भव्यस्वान्ततमोघनागहरयस्सर्वज्ञतीर्थंकरा
विश्वेशाः करुणामृतार्द्रमनसः श्रेयोनदीना जिनाः ॥
भातज्ञानदिनेश्वरा वरतरा नित्यं सुमद्रंकराः
सर्वे तेऽभिजयन्तु देवमनुजाधीशाभिपूज्याः सदा ॥२॥

मिथ्यात्वक्षितिदारणोत्कटहलिः सत्योत्पलार्कोपमा
मुक्त्यागारसुकुञ्चिका जिनधृता दुर्मोहनिद्राहरा ॥
भव्यारामघनावली सुगुणिनी स्याद्वादिनी शाश्वती
जैनी वाग्भविकाघसिन्धुमथनी वोऽस्तु श्रिये सर्वदा॥३॥

श्रीवीराङ्घ्र्यरविन्दभृङ्गिजनता विघ्नाग्निमेघावलि
सम्यक्त्वाभरणेन शोभितवरे सुश्वेतदन्तावले ॥
सिद्धादेवि सुगोपिके जिनवराज्ञायाः सदेष्टार्थदे
भव्येभ्योऽभयदे सदा सुखनिधे दत्तान्न इष्टं द्रुतम् ॥४॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीचतुर्विंशतिजिनस्तवः ॥

॥ उपजातिः ॥

विज्ञातसर्वात्ममनःस्थभाव-
मुक्षाङ्किनं प्राप्तभवाब्धिपारम् ॥
हतोपसर्गव्रजमादिनाथं
नमामि नाभेयमनन्तवीर्यम् ॥१॥
प्रणीतधर्माणमपेतदोषं
बिन्दूकृतापारभवाम्बुराशिम् ॥
व्याप्तप्रतापं भुवनेऽजितं तं
स्तवीमि नित्यं भुवनत्रयेशम् ॥ २ ॥
श्रीजैनधर्माम्बरसप्तवाहं
भव्यात्मनां पापभरं हरन्तम् ॥
जितारिजातं जिनसंभवेशं
सदैव मोक्षाधिपतिं स्तुवेऽहम् ॥ ३ ॥
मुक्तीश आनन्दसरस्सु हंसः
श्रुतार्णवेन्दुस्सुखदायिनाथः ॥
स तीर्थकृद्देवनरेशपूज्यो-
भिनन्दनस्ताद्भविनां हिताय ॥४॥
ययावनन्ताचलमुक्तिवासं
यस्तं महामोहवनीहुताशम् ॥
प्रबोधपद्माकमधीशपद्मं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सदा नमामि द्युमणीन्दुनम्यम् ॥५॥

भव्याङ्गिनां नेत्रमयूरमेघ
देवाधिदेवाभिमतेतमोह ॥
भव्योपकारिन् सुमते यतीन्द्र
भव श्रिये त्वं सुमतिप्रवाह ॥६॥

आखण्डलासेवितपादयुग्म
विशुद्धवाग्भृद्वरमुक्तिवास ॥
कृतान्धविश्वं मदनं विजेत-
र्जय प्रभो नाथ सुपार्श्व नित्यम् ॥७॥

भव्यारविन्दार्यमणं जिनेन्द्रं
स्ववीर्यवीरेण जितेन्द्रियं तम् ॥
मोहानलाम्भोधरमिन्दुभासं
चन्द्रप्रभुं देवनरेशमीडे ॥ ८ ॥

शान्त्यालयं यद्वपुरर्जुनार्चि-
स्तिरस्करोतीन्दुमपोन्द्रपूज्यम् ॥
सुग्रीवसूनुं सुविधिप्रभुं तं
स्तवीम्यहं प्राप्तवरप्रभुत्वम् ॥ ९ ॥

आनन्दपद्माकरराजहंसो
लेभे वरं मुक्तिनिकेतनं यः ॥
यद्दर्शनान्नश्यति पापतापः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स वः श्रिये शीतलशीतलोऽस्तु ॥१०॥
जनाभिलाषं प्रपिपर्ति यस्तं
सुरासुरेन्द्राश्रितपादपद्मम् ॥
श्रेयांनिकायं सुखसागरेन्दुं
श्रेयांसनाथं सततं स्तवीमि ॥११॥
अघद्रुमान्मूलनवारेणेन्द्रः
संसारकान्तारसुसार्थवाहः ॥
भवाब्धिपोतो विमलप्रबोधः
श्रियेऽस्तु नित्यं विमलप्रभुः सः ॥१३॥
अपारजन्माम्बुनिधिं प्रतीर्य
यः प्राप मुक्तिं त्रिजगत्प्रसिद्धम् ॥
अनन्तशक्तिं तमनन्तनाथं
नित्यं स्तुवेऽनन्तगुणेष्टगेहम् ॥१४॥
मोहारिजेताऽखिलभाववेता
सद्धर्मदाताऽक्षयमुक्तिधाता ॥
भव्यान् सुपाता रविवंत्सुभाता
श्रीधर्मभर्ताऽस्तु सुखौघकर्ता ॥१५॥
क्षीराब्धिजेत्रा वरशान्तिवारा
यः सिञ्चति प्राणिसुखाङ्घ्रिपालीम् ॥
स शान्तधामा वरशान्तिधाम

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



श्रीशान्तिनाथोऽस्तु सदैव शान्त्यै ॥१६॥

तिरस्कृतार्कौजसमीतरागं
श्रीकुन्थुनाथेश्वरमाप्तमुक्तिम् ॥
सुरासुरेन्द्रं व्रतितारकेन्दुं
जितान्तरारिं सततं तमीडे ॥१७॥

विज्ञातनिश्शेषपदार्थभावं
महेन्द्रमालानतमाप्तसिद्धिम् ॥
सुदर्शनापत्यसुदर्शनं तं
स्तुवेऽरनाथं जगदेकनाथम् ॥१८॥

शमासिना प्राहतमोहवीरः
सुमुक्तिपूर्वाचलवासरेशः ॥
श्रिये स मल्लीश्वर इष्टदायी
वल्लि¹प्रसिद्धोऽभयवल्लिरस्तु ॥१९॥

सुमित्रजातं वरकच्छपाङ्क-
मनादिकर्माटविचैत्य²चित्यम् ॥
तं सुव्रतीन्द्रं मुनिसुव्रतेशं
नमाम्यहं नष्टककष्टकष्टम् ॥२०॥

मुक्तिं ययौ तीर्थकरो नमिर्यो
विहाय संसारविभासवासम् ॥

---

१ वल्लिः पृथिवी. २ चित्ताग्निम् ।

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



भव्याभयोद्यानसुवर्षवर्षं[1]
तं पूर्णचन्द्राननमानतोऽस्मि ॥२१॥
राजीमतीमिन्दुमुखीं विहाय
मुदाप यो मुक्तिमनोज्ञकान्ताम् ॥
गुणाकरं दोषकरीन्द्रसिंहं
श्रीनेमिनाथं सततं स्तुवेऽहम् ॥२२॥
दिष्टप्रबोधासमहस्तरत्नं
प्राप्तुं भृशं मुक्तिफलं विशालम् ॥
तपोऽतुलाभूषणभूषितं तं
सदा जयन्तं प्रभुपार्श्वमीडे ॥२३॥
दिवौकईशानकिरीटनम्या
तपोंशुमत्तैजसिकाभिभान्ती ॥
सुखावलीपद्मजलावली सा
श्रियेऽस्तु वीराङ्घ्रिनखावली वः ॥२४॥
कृतिव्रजेज्यव्रतिनेमिसूरि-
शिष्याभिरूपोदयनन्दनेन ॥
नता मता मुक्तिरतास्तुतास्ते
श्रिये भवन्त्वाशु जिनाः सदा वः ॥२५॥

---

१ मेघवृष्टिम्.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



## ॥ श्रीविजयनेमिसूरिपञ्चविंशिका ॥

॥ उपजातिः ॥

विहाय सर्वं प्रभवोपभोग-
मादाय रम्यं शिवदं व्रतित्वम् ॥
य आप सर्वागमपारमाशु
श्रीनेमिसूरिं सततं स्तुवे तम् ॥१॥

विदग्धपद्माकरराजहंसं
विदग्धदोषौघविशालदावम् ॥
अखण्डभूव्याप्तवरप्रतापं
श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥२॥

वितन्द्रिपङ्कं प्रविमुक्तदारं
जगज्जनप्रावृषिकाभ्रवारम् ॥
स्वदेशनारञ्जितभव्यभारं
श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥३॥

समस्तनिक्षेपनयाम्बुनाथं
स्फुरद्विवेकं स्फुटशर्मगेहम् ॥
चारुव्रतं त्यक्तविलासवृन्दं
श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥४॥

उदारबुद्धिं वचनप्रसिद्धि-
मासन्नसिद्धिं भुवनप्रसिद्धिम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



विज्ञानदीप्तिव्रजसुप्रदीप्तं
श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥५॥
उद्दामकन्दर्प्पहुताशपाथोऽ-
भिरूपसङ्घात्रदिनेशमेकम् ॥
प्रमादमातङ्गमृगेन्द्रराजं
श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥६॥
भव्यात्मभृङ्गोरुसमूहसेव्य-
पादारविन्दद्वितयं मुनीन्द्रम् ॥
सूर्यांशुशोभं सुकलापयोधिं
श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥७॥
संसारसेतुं जिनधर्मकेतुं
प्रभासमानं प्रतिभासमानम् ॥
मुनीश्वरं पौर्णिमचन्द्रवक्त्रं
श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥८॥
कामारिसम्बोधमहाप्रवीरं
सम्बोधपाथोधिमुदारवृत्तिम् ॥
व्यतीतमानं विगताभिलाषं
श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥९॥
प्रवीणसन्दोहसुधांशुमन्तं
प्रणष्टसन्देहभरं कृतान्ते ॥

---

१ विनाश, २ समूह,

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्यस्वरूपाश्रयणप्रगल्भं
श्रीनेमिसूरिं प्रणमाम्यजस्त्रम् ॥१०॥
भव्याङ्गिनां सर्वसमीहितौघ-
प्रसिद्धिपाथोजपयःसमूहम् ॥
सुकेतकीपत्रसमाक्षियुग्मं
श्रीनेमिसूरिं प्रणमाम्यजस्त्रम् ॥११॥
स्वशोभया चन्द्रकलां बिभर्त्ति
यस्तिग्मभारङ्घ्रिघनखश्रियं तम् ॥
सर्वाङ्गिकारुण्यमहासमुद्रं
श्रीनेमिसूरिं प्रणमाम्यजस्त्रम् ॥१२॥
गताश्रवं पञ्चमहाव्रतेशं
रत्नत्रयस्वामिनमाशयाब्धिम् ॥
श्रेयस्करं जन्मपयोधिपोतं
श्रीनेमिसूरिं प्रणमाम्यजस्त्रम् ॥१३॥
जिनेशसिद्धान्तविचारदक्षं
तीर्थंकरादिष्टकरं मुनीशम् ॥
कषायसङ्घक्षणदाश्ववाहं
श्रीनेमिसूरिं प्रणमाम्यजस्त्रम् ॥१४॥
समस्तविश्वे ततसाधुवादं
भक्ते च शत्रौ समभावदृष्टिम् ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



आनन्दभङ्गप्रभृताम्बुराशिं
श्रीनेमिसूरिं प्रणमाम्यजस्रम् ॥१५॥

॥ शालिनी ॥

विज्ञाम्भोजावासहंसायमानो
विश्वाम्भोजोद्बोधहंसायमानः ॥
शर्माम्भोजोद्भेदतोयायमानः
शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥१६॥

निस्तन्द्रौघो जैनधर्माम्बरार्कः
शीतांशूर्जा मुक्तिमार्गप्रदर्शी ॥
प्राज्ञप्राच्यो मुक्तसंसारलीलः
शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥१७॥

श्रेयःसिन्धुः स्फारशीलप्रभावो
भास्वद्दिव्यः प्रास्तमानप्रयासः ॥
आशुप्रज्ञो धैर्यकेणाद्रितुल्यः
शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥१८॥

गाम्भीर्येणाम्भोधितुल्यो मुनीन्द्रः
कारुण्याब्धिः शुद्धधर्मस्य वक्ता॥
स्फारज्ञानो भव्यकल्याणहेतुः
शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥१९॥

---

१ तरङ्ग. २ सूर्य ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सत्त्वाधारो योगिनक्षत्रचन्द्रः
शास्त्राब्धीन्दुर्वीतसर्वस्पृहौघः ॥
फुल्लाब्जास्यः शुद्धवैराग्यसिन्धुः
शश्वज्जीयान्नेमिसूरिः प्रकामम् ॥२०॥

॥ शार्दूलविक्रीडितम् ॥

यस्य प्रौढतमप्रतापतपनः शश्वद्भुवि भ्राजते
यस्याङ्घ्यम्बुजमातनोति भविनामानन्दभङ्ग[1]व्रजम् ॥
यस्य ज्ञानमृगेश्वरेण परवादीभाः प्रणष्टा द्रुतं
भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२१॥

यस्याभ्रेण समं वचो नयगमस्याद्वादयुक्तं वरं
भव्यप्रावृषिकप्रमोदमतुलं नित्यं विधत्ते भृशम् ॥
यस्यातुल्यमरं यशः क्षितितले सर्वासु दिक्षूद्गतं
भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२२॥

सेव्यश्रीगुरुराजवृद्धिविजयः प्रज्ञाः सदा यं श्रिताः
सम्यग्बोधसरिच्छिलोच्चयवरः स्याद्वादपाथोनिधिः ॥
अन्तेवासिमधुव्रतश्रितपदाम्भोजः प्रशस्तक्रियो
भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२३॥

दिव्यक्षेमनिधिर्विशुद्धचरणो वाचंयमेशाग्रणीः
स्फाराः पूर्वयुगप्रधानविधृताः सर्वे गुणा यं श्रिताः ॥

---

१ भङ्गस्तरङ्गः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्याद्वादाम्बुनिधिप्रभासनविधुर्भूमीश्वरार्च्यः सदा
भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२४॥
गुर्वादेशधरो महाव्रतिवरो गाम्भीर्यरत्नाकरो
मेधाविप्रवरो हतानृतभरो भव्यात्मभद्रंकरः ॥
गच्छैश्वर्यधरो महाभयहरः फुल्लास्त्रदावाशरो
भव्यादभ्रविभूतये भवतु स श्रीनेमिसूरीश्वरः ॥२५॥
यत्स्तोत्रपाठकरणेन महाभयश्च
याति प्रणाशमखिलाघभरं जनानाम् ॥
तन्नेमिसूरिचरणाम्बुजयुग्ममर्च्यं
संसेव्यतां भविजनैः सततं पवित्रम् ॥ २६ ॥

---

॥ श्रीभुवनदीपकस्तोत्रम् ॥

॥ श्रीमत्परमगुरुविजयनेमिसूरिद्वात्रिंशिका ॥

यद्वाक्प्रफुल्लितकजे रतमर्त्यभृङ्गे
सत्योष्णरश्मिकिरणप्रतिभासमाने ॥
पूर्वाभिरूपसुवृताद्भुतसिद्धिलक्ष्मी-
र्वीतान्तरामनुपमस्थितिमभ्यकार्षीत् ॥१॥
भृङ्गव्रजोत्कटविनोदभरप्रदातुः
संफुल्लितस्य जलजस्य मनोज्ञशोभा ॥
संस्मारिता ननु जवेन यदास्यभाभिः

---

१ कामदेव—२ अग्नि.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



संस्मारितश्च वरपौर्णिमशीतभास्वान् ॥२॥
विश्वाभिरूपनिचयाभिनतोत्तमाङ्ग–
श्रेणीजिनेन्द्रवरशासनमौलिभान्ती ॥
स्पर्शेन यस्य विमलस्य पदस्य पूता
स्तोष्यामि तं व्रतिपतिं किल नेमिसूरिम् ॥३॥
( त्रिभिर्विशेषकम् )
ज्ञातुं कृतीज्य तव किञ्चिदपि स्वरूपं
शक्ता न संयमिपते जडबुद्धयस्तु ॥
जानाति रूपमिभबालतरो व्रतिन् किं
कण्ठीरवस्य नगभेदकगर्जनस्य ॥४॥
पारं तवामलमते गुणवृन्दसिन्धो–
र्योगीश्वरेण खलु वीतमदेन गम्यम् ॥
निर्बुद्धिरेतुमधिपो द्रुफलं कुतोऽहं
प्राप्नोति किं विमतिवामन उन्नताप्यम् ॥५॥
धीमन्मुने गतधियं तव भक्तिरेव
स्तोतुं प्रयोजयति मां भवरक्षक त्वाम् ॥
प्रावृष्यतीव सुनटन्ति कलापिनो यत्
तद्गर्ज्जदम्बुदरवश्रवणैकजन्यम् ॥६॥
अल्पाशयेन तव नाथ मयोच्यमानं
स्तोत्रं धरिष्यति हृदि प्रवराशयोऽपि ॥
क्षीराब्धिमौक्तिकमदन्नपि राजहंसः

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



किञ्जल्कमत्ति किल कर्दमजस्य किं नो ॥७॥
आराद्भवान् प्रवरशान्तरसाम्बुराशि-
र्नामैव ते तदपि लोकहितं विधत्ते ॥
दूरस्थितार्ककिरणैररविन्दबन्धान्
मुक्ता न किं मधुकराः सकला भवन्ति ॥८॥
त्वय्येव सन्ति निखिला विमला गुणौघा
अत्राद्भुतं न किमपि प्रविकस्वरास्य ॥
प्राचीं दिशं नहि विहाय सहस्रभानुः
स्फूर्जत्प्रभाप्रकरकोऽन्यदिशं वृणोति ॥९॥
रूपेण कामसदृशोऽप्यभिभूतकाम-
स्थामा त्वमद्भुतशमः समभावदातः ॥
त्वामिष्टदेवविटपिन्ननु सर्वकामो
दृष्ट्वैव याति सहसा परिपूर्णभावम् ॥१०॥
श्रेणीकृतामलयशो विबुधप्रवीण
योग्यर्च्य शश्वदुदयस्य महाप्रताप ॥
उद्गच्छदब्जभरवल्लभताम्रपादा
पादस्य ते नखततिः सततं विभाति ॥११॥
अन्धीकृताखिलजगन्मदनप्रगाढ-
मेघप्रणाशपवमानप्रदर्शने ते ॥
नेत्राम्बुजस्य भवतीश निमेषमन्द-
पक्ष्मावलीह नयनद्वितयं जनानाम् ॥१२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



नैसर्गधैर्यविजितामरशैलवर्यं
स्फारप्रभासमतमीकृतचन्द्रकान्तम् ॥
संस्मारकं च शिवतिथ्युडुवल्लभस्य
विस्मापकं तव विभाति गुरो ललाटम् ॥१३॥

नाथोज्ज्वलाङ्घ्रिगतिपूततरावनीक
सत्यं मितं च सुहितं सुवचोरसं ते ॥
पीत्वामृतं खलु सुदुर्लभपानमाशु
धीजीवनस्नपितभव्यजनास्त्यजन्ति ॥१४॥

नाथ प्रधीः कुमतिपर्वतभेदिकाया-
स्त्वद्देशनारवमृगेश्वरगर्जनायाः ॥
अज्ञानवादमदमत्तमहाकुतीर्थ-
मातङ्गकास्तु सहसा सकला विनष्टाः ॥१५॥

गम्भीरतारसभृता तव देशनागी-
र्मेघावलीध्वनिरिवाहिभुजः सुभव्यान् ॥
सम्यक् प्रमोदयति सारविचारवारा
प्रौढाशयप्रकटपुण्यगुणप्रकाश ॥१६॥

संसारकूपपतनार्त्ततरां विमुग्धां
रक्षन्ननन्यगतिकां जनतां मुनीश ॥
भारण्डपक्षिवदिलावलयेऽप्रमत्तः
स्वामिन्सदा विचरसि प्रहतस्पृहारे ॥१७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्याद्वादभासक सदोदय शर्मधाम
निर्यामकं गहनसंसृतिवारिराशौ ॥
सच्छासनं प्रमितिभङ्गनयोपशोभि
शश्वत् प्रदीपयसि दीप्तविभ व्रतिंस्त्वम् ॥१८॥
भो देहभाक्प्रकर यत्स्फुरितप्रभावान्
मिथ्यात्वसान्द्रतिमिरं व्रजति प्रणाशम् ॥
तन्नामदीप्रकरदीपमजस्रमस्य
सेवस्व सूरिप्रवरस्य सुभक्तिभावात् ॥१९॥
त्वत्तः प्रविज्ञ हिमसानुमतो मुनीश
कल्याणफुल्लफलिवृन्दविभूषिताङ्गात् ॥
जाता वरा जगति निर्मलकीर्तिगङ्गा
सर्वा दिशोऽकृत कृतिन् परमाः पवित्राः ॥२०॥
लोकप्रसिद्धतरवर्यकुलावतंस–
कोटीश्वरप्रकरपूजितपादपद्म ॥
बुद्धिप्रभावकृतदुष्टमताभिषङ्ग
पूज्यो मुनीश सततं जगतीतले त्वम् ॥२१॥
वैराग्यवारिनिधिभासनशीतभानो
संसारतारक सदाप्तसमूहसेविन् ॥
चारित्रभास्वरवरायुधमात्तमाशु
नाथ त्वया खलु विमोहरिपुं प्रहन्तुम् ॥२२॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



स्थाने प्रमोदमपरे न जना लभन्ते
कृत्वा मुने गुणनिधान सुदर्शनं ते ॥
ग्रीष्मे विहाय सुभगां रवितापतप्त-
श्छायां सुगन्धिफलिनो दहनं किमिच्छेत् ॥२३॥

सद्बोधदायककिरीट मुनीश सम्यग्
धीश्रीमदोघनुतपादपयोजयुग्म ॥
सर्वात्मना विमलशर्मभृताकृपाश्री-
र्योगीश ते हृदि कजे द्युतिते विभाति ॥२४॥

अन्ये स्मरन्त्वपरमप्यहमिज्यबुद्ध्या
त्वामेव नाथ हृदये विशदे स्मरामि ॥
धाराधरं ननु विहाय न नीलकण्ठः
पृथ्वीतलेऽपि निखिले भजतेऽन्यमीश ॥२५॥

मुद्धाम धामनलिनीशसम त्वयीन
नास्त्येव किञ्चिदपि योगिपते जडत्वम् ॥
स्पष्टप्रकाशितमयूखसमूहसूर्ये
ध्वान्तस्थितिस्तु नहि किञ्चिदपि प्रभाते ॥२६॥

सन्तीह नाथ बहवः परवादिनोऽपि
त्वं त्वेक एव शिवदोऽनृतवादहीनः ॥
भूयिष्ठभानि दिवि सन्ति तथापि शश्व-
च्चन्द्रेतरो न वितनोति चकोरहर्षम् ॥२७॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



अन्धीकृताखिलकुतीर्थिकघूकसङ्घ
फुल्लीकृताखिलचतुर्विधसङ्घपद्म ॥
दूरीकृताखिलजगज्जनसङ्घनान्ध
योगिंस्त्वमत्र तरणे जयतादभीक्ष्णम् ॥२८॥

वक्त्राद्विनिर्गतगभीरतरस्वनौघ-
तुल्यीकृतामृतपयोधितरङ्गनाद ॥
प्रज्ञाधरीकृतसुरेन्द्रगुरो महौजः
श्रेयःश्रियं मुनिप नो वितनु त्वमाशु ॥२९॥

मिथ्यात्वपुद्गधरातलदारणोग्र-
सीरायमाण जिनदर्शनबीजवप्तः ॥
मालायमान हृदये जिनशारदाया-
स्त्वामीश सूक्ष्मसुमते सततं स्तवीमि ॥३०॥

सद्बुद्धिवृद्धिसुलताम्बुद नेमिसूरे
स्याद्वादभृत्सुमतिसिन्धुविधो यशोरम् ॥
त्वद्दर्शनादुदयमेति नयप्रतापं
विज्ञानसिद्धिविजयं जनता सुऋद्धिम् ॥३१॥

कीर्तिप्रभावकुसुमार्चितपद्मनेत्र
वैराग्यचन्दनविलेपनलिप्तचित्त ॥
स्तोत्रं गुणामृतभृतं तव भक्तिरागा-

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



ल्लावण्यधाम रचितं च मया निधानं ॥३२॥
आपुष्पदन्तमिदमद्भुतभावशोभि
स्तोत्रं सदा मतिमतां हृदयं प्रभायात् ॥
भव्यात्मनां भुवनदीपकनामतेषां
प्रज्ञाभिनन्दनवरं हृदि ये धरेयुः ॥३३॥

---

॥ श्रीमद्गुर्वष्टकम् ॥

॥ उपजातिः ॥

विज्ञाय संसारमनित्यमाशु
त्यक्त्वा समस्तं भवदुष्टभोगम् ॥
दधार साधुव्रतमिन्द्रपूज्यं
यस्तं सुभक्त्योदयमानतोऽस्मि ॥१॥

अनन्तसौख्यग्रहणे सुयत्नं
दशप्रकारव्रतिधर्मयुक्तम् ॥
स्फूर्ज्जत्सुमेधाकिरणप्रभान्तं
गुरुं सुभक्त्योदयमानतोऽस्मि ॥२॥

नयप्रमाणागमधारिमुख्य–
माज्ञां गुरूणां सततं धरन्तम्॥
मेधावदोघप्रणतं जयन्तं

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



गुरुं सुभक्त्योदयमानतोऽस्मि ॥३॥

चारित्रचिन्तामणिरक्षणाय
सदाप्रयासं करुणानिधानम् ॥
गुणाकरं संयमिपूगपूज्यं
गुरुं सुभक्त्योदयमानतोऽस्मि ॥४॥

तपः प्रशस्तोरुधनं मुनीन्द्रं
सम्पन्नगाम्भीर्यमनल्पबोधम् ॥
विज्ञर्क्ष[1]सन्दोहनिशाधिनाथं
गुरुं सुभक्त्योदयमानतोऽस्मि ॥५॥

स्याद्वादसिन्धूल्लसनोडुनाथं
प्रमोदपाथोधिवरं सनाथम् ॥
प्रमादपाथोजहिमं महान्तं
गुरुं सुभक्त्योदयमानतोऽस्मि ॥६॥

विज्ञानसौभाग्यधरप्रवीणं
गुर्वङ्घ्रिसेवैकनिविष्टचित्तम् ॥
भव्योपकारं रचयन्तमाशु
गुरुं सुभक्त्योदयमानतोऽस्मि ॥७॥

विशारदग्रामनभस्तमोरिं
सद्बोधिबीजोद्भववारिवारम् ॥

---

१, समूह.

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



सद्बोधदायिप्रवरं सदाहं
गुरुं सुभक्त्योदयमानतोऽस्मि ॥८॥

निरारम्भत्रातं विमलतरवैराग्यजलिधिं
गुणग्रामस्थानं मदनवनवह्निं कृतधियम् ॥
कृपापूर्णस्वान्तं नयगममहाम्भोधिभपतिं
स्तुवेऽजस्रं भक्त्या सुगुरुमुदयं स्फारधिषणम्॥९॥

---

नास्त्येव सुन्दरतरा बहुकल्पनाऽत्र
नास्त्येव शब्दरचना जनतोषदात्री ॥
ग्रन्थो लघुस्तदपि भक्तिवशाज्जिनस्य
निर्बुद्धिना शिशुहिताय मया कृतोऽयम् ॥१॥

नेत्रर्षिनिधिचन्द्राङ्के १९७२ वर्षे भक्त्या गुरोरयम् ॥
नभसः सितसप्तम्यां ग्रन्थः पूर्णीकृतो मया ॥१॥

---

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir



॥ श्रीः ॥

श्रीज्ञातनन्दनचरमतीर्थकृन्महावीरवीरशासनपूर्वाचलोष्णमयूख-सधर्मसुधर्मचिन्तामणिदेशकसमीपसंसारसिन्धुपारसकलशास्त्रज्ञशिरोमणिन्यायनीरनिधिप्रकाशनविधुनिसर्गप्रशान्तभुवनप्रसिद्धमिथ्यात्वसान्द्रध्वान्तवितानप्रणाशसहस्रकिरणकारुण्यपीनाकरशारदौषधीश्वरसुखधामभविभव्यधामविद्वद्दूरभ्रमरभारपूजितप्रशस्तपादपद्मद्वैतस्वर्गीमेघरवराञ्जितभव्यनीलकण्ठसमूहविस्मृतस्वारस्वरूपस्मरस्वाहापतिज्वालजलसमाजगुणगणधरवरजगद्बन्धुजगद्धितकारकतपोगच्छगगनग्रहाधिपपवित्रचरित्रपरमपूज्यसंविग्नशाखीयभट्टारकाचार्यवर्यश्रीमद्विजयनेमिसूरिचरणाम्भोजभ्रमरायमाणानुयोगाचार्यपन्न्यासोदयविजयगणिशिष्यमुनिनन्दनविजयविरचितोऽयं

॥ स्तोत्रभानुग्रन्थः समाप्तः ॥ श्रीरस्तु ॥

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

# शुद्धिपत्रम् ॥

| पृष्ठ. | पंक्ति. | अशुद्धम्. | शुद्धम्. |
|---|---|---|---|
| ६ | ९ | भासुरं | भासुर- |
| ७ | १८ | द्विरेफैः | द्विरेफे |
| १३ | १६ | चित्ताभाष्टं | चित्ताभीष्टं |
| १४ | ९ | शाभमानभुवनत्रये | शोभमान भुवनत्र |
| १८ | १४ | प्रकान्त | प्रकान्तः ॥ |
| २० | ९ | नेनिनाथो | नेमिनाथो |
| २० | १७ | मुक्त्यम्भाजं | मुक्त्यम्भोजं |
| २० | १८ | वाण्यम्बु | वाण्यम्बु |
| २० | १९ | प्रह्वश्री | प्रह्वश्री |
| २६ | ४ | श्रेयां | श्रेयो |
| २६ | ६ | द्रुमा | द्रुमो |
| २६ | १४ | वेता | वेत्ता |
| २६ | १६ | वंत्सु | वत्सु |
| २७ | १९ | विभास | विलास |
| ३४ | ८ | भरं | मरं |

For Private And Personal Use Only

Shri Mahavir Jain Aradhana Kendra www.kobatirth.org Acharya Shri Kailassagarsuri Gyanmandir

अमदावादनी श्रीजैनग्रन्थप्रकाशकसभानुं

# पुस्तक प्रसिद्धिखातुं.

## संबोधप्रकरण ??

विशेष अमारी सभा तरफथी हालमां जैनग्रन्थो बहार पाडवानुं कार्य शरु करवामां आवेल छे. ते पैकी हालमां "संबोध-प्रकरण" नामनो ग्रन्थ तैयार छे, आ ग्रन्थ १४४४ ग्रन्थना कर्त्ता श्रीमान् हरिभद्रसूरिमहाराजे मागधीभाषामां गाथाबद्ध लगभग बे हजार श्लोकना प्रमाणमां रचेलो छे. आ ग्रन्थमां साधु-धर्मनो अधिकार तेम श्रावकधर्मनो अधिकार विगेरे घणाज उपयोगी विषयो दाखल कर्या छे.

### छपाइ तैयार थयेल छे.

## जैन तत्त्वपरीक्षा.

आ न्यायनो ग्रन्थ परमपूज्य परमोपकारी प्रातःस्मरणीय आचार्य महाराजजी साहेब श्रीमान् विजयनेमिसूरीश्वरजी महाराजजीना विद्वद्वर शिष्य श्रीमान् अनुयोगाचार्य पन्न्यासजी श्रीउदयविजयजी गणीजी महाराजे संस्कृतभाषामां लगभग ८०० श्लोकना प्रमाणमां रचेलो छे. जेमां शब्दनी पोद्‌गलिकत्वसिद्धि तथा श्रोत्रनी प्राप्यकारितासिद्धि विगेरे उत्तमविषयो घणी सारीरीते निरूपण कर्या छे.

ग्रन्थ मळवानुं स्थान
जैन ग्रन्थप्रकाशक सभा.
धीकांटा शेठ जेसींगभाइनी वाडी
अमदावाद.

ली०
जैनग्रन्थप्रकाशकसभा.

For Private And Personal Use Only